डॉ. आभा द्विवेदी (सहायक आचार्य)
वैशाली महिला महाविद्यालय, हाजीपुर

B.A. II

Date : / /

हिन्दी में अनुवाद करें –

(1) पञ्चविंशति: शतानि वत्सराणां व्यतीतानि, यदा गौतम-कुलोत्पन्न: सिद्धार्थ: इमां भारतभुवम् अलञ्चकार स्वजन्मना। भागीरथ्या उत्तरे तीरे कपिलवस्तुनाम महनीयं नगरमेकमासीत। शाक्यवंशोत्पन्न: शुद्धोदनस्तत्र राज्यम् अकरोत। तस्य मायादेवी नाम सती भार्याऽभवत्। तस्याञ्च सिद्धार्थो नाम सूनुर्जन्म लेभे। स शैशवादेव सुवृत्तो विवेकी चाभूत्।

(2) अस्माकं भारतदेश: बहुप्राचीन: अतिपवित्रो विशालश्च अस्ति। अत्रैव षड् ऋतव:, नारायणस्य विविधा अवताराश्च भवन्ति संसारस्य सर्वोच्चशैल: हिमालयोऽपि अस्य शिरसि हेममुकुट इव विराजते। इत एव गङ्गा-यमुनाद्या बह्यो नद्यो वहन्ति। अत्रैव काशी-अयोध्या-मथुरा-मायाद्यास्ता: प्राचीना: सप्तपुर्य: सन्ति।

(3) सत्येनैव जगत: स्थिति: वर्तते। सत्यस्यैव महिम्ना मानवा: परस्परं विश्वसन्ति। यादृक् सत्यस्य महत्वं न तादृग् अन्यस्य कस्यापि वस्तुन:। सत्यभाषणेन निर्भीका भवाम:, अस्माकं यश: प्रतिष्ठा गौरवञ्च वर्धते। सत्यव्रतो न कस्मिंश्चिदपि पापे प्रवर्तते। "नहि सत्यात्परो धर्मो नानृतात् पातकं महत्" इति मतमद्यापि प्रशस्यते जनै:। अत एवास्माभि: सदा सत्य-वादिभिर्भवितव्यम्।